"ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ।। (१२,४)

मोक्षानुभवे आनन्दतारतम्यं नास्ति । मुक्तिः जीवन्मुक्तिर्वा विदेहमुक्तिर्वा गीतासु उक्तं । "अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ।। (५,२६)

"अत्र ब्रह्मस्वमश्नुते" इति श्रुतिः जीवन्मुक्ति विशदीकरोति । 'न तस्य ग्राणा उत्क्रामन्ति' इत्युपदिशति च । तत्त्वमसि, अयमात्मा ब्रह्म' अहं ब्रह्मास्मि, प्रज्ञानं ब्रह्मति महावाक्यानि निराकार ब्रह्मसायुष्यं निर्विकल्पसमाधि रपष्टमुपदिशन्ति ।।

२५. सर्वेऽपि मुक्तियोग्याः सर्वेऽपि मुक्तियोग्याः ॥ सर्वेऽपि मुक्तियोग्याः न कोऽपि नित्यसंसारी नित्यनरकी

च । मोक्षः केवलदुःखनिवृत्तिर्न, परमानन्दरूपः ॥ नाथमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रु तेन ।

यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनू स्वां। (कठोपनिषत्)

त्वं हि नः पिता योऽस्माकं अविद्यायाः परं पारं तारयत्ति ॥ (प्रश्नोपनिषत्)

सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ।।

द्वितीयो भागः दिव्यजीवनप्रमाणवाक्यानि ॥

प्रस्थानत्रयवाक्यानि ॥ (एतेषामर्थः गुरुदेवशिवानन्दकृतप्रस्थानत्रयभाध्येषुप्तम्यक् निरूपितः)

उपनिषद्वाक्यानि ॥

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।।१।। (ईशावास्योपनिषत्)

तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं तां होवाच किमेतद्यत्क्षमिति । सा ब्रह्मेति होवाच ॥२।। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥३

(केनोपनिषत्)

महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥४ (कठोपनिषत्)

तमेब भान्तमनुभाति सर्व तस्य भासा सर्वमिदं विभाति ।।५ (कठोपनिषत्)

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ॥६ (मुण्डकोपनिषत्)

सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुद्दायां ।।७ (तैत्तिरीयोपनिषत्)

रसो वै सः रसं ह्यवायं लब्ध्वाऽऽनन्दी भवती ॥८ (तैत्तिरीयोपनिषत्)

कं ब्रह्म खं ब्रह्म ॥६

(छान्दोग्योपनिषत्)

सदेव सौम्य इदमग्र आसीत् एकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेति ।।१० (छान्दोग्योपनिषत्)

य आत्माऽपहृतपाप्मा विजरो विमृत्यु विंशोकोऽविजिधित्सोऽ– पिवा स सत्यकामः सत्यसंकल्पः ॥११ (छान्दोग्योपनिषत्)

एकाकी न रमते । आराममस्य पश्यन्ति न ते पश्यति कश्चन (बृहदारण्यकोपनिषत्)

आराग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते । १३ (श्वेताश्वतरोपनिषत्)

स्वभावमेकं कवयो वदन्ति कालं तथान्ये परिमुह्यमानाः दैवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रम् ।१४ (श्वेताश्वतरोपनिषत्)

मन एव मनुष्याणां कारणं बन्धमोक्षयोः बद्ध' तु विषयामुक्तं निर्विषयं स्मृतम् । १५ (ब्रह्मबिन्दुपनिषत्)

उमासहायं परमेश्वरं प्रभु'त्रिलोचनं नीलकण्ठं प्रशान्तं ।१६ (कैवल्योपनिषत्)

ओंकाररथमारुह्य विष्णु' कृत्वा तु सारथिं महालोकपदान्वेषी रुद्राराधनतत्परः ।१७ (अमृतबिन्दूपनिषत्)

हृत्पुण्डरीकमध्ये तु भावयेत्परमेश्वरम् साक्षिणं बुद्धिनृत्तस्य परमप्रेमगोचरम् । १८ (मैत्रेय्युपनिषत्)

दृष्टि ज्ञानमयीं कृत्वा पश्येद्ब्रह्ममयं जगत् (मैत्रेय्युपनिषत्)

भक्त्या विना ब्रह्मज्ञानं कदापि न जायते । २० (त्रिपाद्विभूति महानारायणोपनिषत्)

द्वे पदे बन्धमोक्षाय निर्ममेति ममेति च ममेति बध्यते (वराहोपनिषत्) जन्तुर्निममेति विमुच्यते । २१

पु'खानुपु खविषयेक्षणतत्परोऽपि

ब्रह्मावलोकनधियं न जहाति योगी (वराहोपनिषत्) संगीततालयवाद्यवशंगताऽपि मौलिस्थकुम्भर्पाररक्षणधीर्नटीव ॥२२ हरे राम हरे राम राम राम हरे हरे । हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ।। २३ (कलिसन्तरणोपनिषत्)

निष्कामानामेव श्रीविद्यासिद्धिः । २५ (सौभाग्यलक्ष्म्युपनिषत्) महाबाक्यानि -तत्त्वमसि, अयमात्मा ब्रह्म, अहं ब्रह्मास्मि, प्रज्ञानं ब्रह्म ॥२५॥

(२) ब्रह्मसूत्राणि

प्रथमः समन्वयाध्यायः ।।

१. अथातो ब्रह्मजिज्ञासा । (I, 1, 1)
२. जन्माद्यस्य यतः । (1,1,2)
३. शास्त्रयोनित्वात् । (I, 1, 3)
४. तप्त समन्वयात् । (I, 1, 4)
५. आनन्दमयोऽभ्यासात् । (I, 1, 12)
६. अदृश्यत्वादिगुणको धर्मोक्तेः । (I, 2, 21)
७. द्यभ्वाद्यायतनं स्वशब्दात् । (I, 3, 1)
८. अक्षरमम्बरान्तरधृतेः । (I. 3, 10)
९. तदुपर्यपि बादरायणः संभवात् । (1, 3, 26)
१०. प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधात् । (I, 4. 23)

द्वितीयः अविरोधाध्यायः ।।

११. तदन्यत्वमारम्भणादिशब्दादिभ्यः । (II, 1, 14)
१२. सर्वोपेता च तद्दर्शनात् । (II, 1, 30)
१३. लोकवत्त लीलाकैवल्यं । (II, 1, 33)
१४. वैषम्यनैघृण्ये न सापेक्षत्वात् तथा हि दर्शयति । (II,1, 34)
१५. सर्वधर्मोपपत्तेश्च । (11, 1, 37)

तृतीयः साधनाध्यायः ॥

१६. तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां (III, 1, 1)
१७. विद्याकमणोरिति तु प्रकृतत्वात् । (III, 1, 17)
१८. फलमत उपपत्तेः । (111, 2, 38)
१९. सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् । (III, 3, 1)
२०. सर्वभेदादन्यत्रेमे । (III, 3, 10)

चतुर्थः फलाध्यायः ।।

२१. ब्रह्मदृष्टिरुत्कर्षात् । (IV, 1, 5)
२२. एवमप्युपन्यासात् पूर्वभावादविरोध' बादरायणः । (IV, 4, 7)
२३. द्वादशाइवदुभर्यावधं बादारायणोऽतः । (IV. 4, 12)
२४. भोगमात्रसाम्यलिंगाच्च । (IV, 4, 21)
२५. अनावृत्तिः शब्दादनावृत्तिः शब्दात् । (IV, 4, 22)

[३] भगवद्गीताश्लोकानि

१. अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते । (11, 25)

२. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन मा कर्मफल हेतुभूः मा ते संगोऽस्त्वकर्मणि । (II, 47)

३. रागद्वषवियुक्तैम्तु विषयानिन्द्रियैश्चरन् आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति । (II, 64)

४. एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति । 11, 72)

५. देवान् भावयतानेन ते देवा भावयन्तु वः परस्परं भावयन्तः श्रयः परमवाप्स्यथ । (III, 2)

६. यदा यदा हि धर्मस्य ग्लानिर्भवति भारत अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ।

७. परित्राणाय साधूनां विनाशाय च दुष्कृताम् धर्मसंस्थापनार्थाय संभवामि युगे युगे । (IV, 7, 8)

८. ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् मम वर्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः । (IV, 11)

९. . ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः तेषामादित्यवज्ज्ञानं प्रकाशर्यात तत्परम् । (IV, 16)

१०. उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत् आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः । (VI, 5)

११. आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन सुखं वा यदि वा दुःखं स योगी परमो मतः । (VI, 32)

१२. अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा र्माय सर्वमिदं प्रोतं सूत्रे मणिगणा इव । (VII, 7)

१३. अन्तकाले च मामेव स्मरन् मुक्त्वा कलेबरम् यः प्नयाति स मद्भावं याति नास्त्यत्र संशयः । (VIII, 5)

१४. ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् । (IX, 15)

१५. परं ब्रह्म परं धाम पवित्रं परमं भवान् पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् । (X, 12)

१६. भक्त्या त्वनन्यया लभ्य अहमेवंविधोऽर्जुन ज्ञातु ं द्रष्टु ं च तत्त्वेन प्रवेष्टुं च परन्तप । (X1,54)

१७. तेषामहं समुद्धर्ता मृत्युसंसारसागरात् भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् । (XII, 7)

१८. ज्योतिषामपि तज्ज्योति स्तमसः परमुच्यते ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्टितम् । (XIII, 47)

१९. ब्रह्मणो हि प्रतिष्ठाइममृतस्याव्ययस्य च शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च

२०. यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः । (XV,27)

२१. त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् । (XVI, 21)

२२. ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः (XVII, 23)

२३. मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे

२४. सवेधर्मान् परित्यज्य मामेकं शरणं ब्रज   अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः । (XVII, 65, 66)

२५. यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः तत्र श्रीर्विज्रयो भूतिध्रु वा नीतिर्मतिर्मम । (XVIII, 78)

अन्यप्रमाणवाक्यानि

1. मनुधर्मशास्त्रम् ।।

१. धर्ममूलं स्मृतिशीले वेदोऽखिलो च तद्विदाम् आचारश्चैव साधूनामात्मनस्तुष्टिरेव च । (II, 6)

२. श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः इद्द कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् । (II, 9)
३. एकाक्षरं परं ब्रह्म प्राणायामः परं तपः सावित्र्यास्तु परं नास्ति मौनात् सत्यं विशिष्यते । (11,83)
४. जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते । (II, 87)
५. सावित्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः नायन्त्रितस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी । (II, 118)
६. यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः । (III, 56)
७. नात्मानमवमन्येत पूर्वाभिर समृद्धिभिः आमृत्योः श्रियमन्विच्छेन्नैनां मन्येत दुर्लभाम् ।(IV, 137)
८. मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम् जपतां जुद्धतां चैव विनिपातो न विद्यते । (IV, 146)
९. एकः प्रजायते जन्तुरेक एव प्रलीयते एकस्तु भु'कै सुकृतमेक एत्र च दुञ्झतम् । (IV, 240)
१०. अनभ्यासेन वेदानामाचारस्य च वर्जनात् आलस्यादन्नदोपाच्च मृत्युर्विप्रान् जिघांसति । (V, 4)
११. मांसभक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम् एत्तन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः । (V, 55)
१२. सर्वेषामपि शौचानामर्थशौचं परं स्मृतम् योऽर्थे शुचिहि स शुचिर्न मृद्वारिशुचिः शुचिः । (V.106)
१३. नाभिनन्देत मरणं नाभिनन्देत जीवितम् कालमेव प्रतीक्षेत निर्देशं भृतको यथा । (VI, 45)
१४. धृतिः क्षमादमोऽस्तेयं शौचमिन्द्रियनिग्रहः धीविद्यासत्यमक्रोधो दशकं धर्मलक्षणम । (VII. 92)
१५. राज्ञो हि रक्षाधिकृताः परश्वादायिनः शठाः भृत्या भवन्ति प्रायेण तेभ्यो रक्षदिमाः प्रजा । (VII, 123)
१६. द्यौर्भूमिरापो हृदयं चन्द्रार्काग्नियमानिलाः रात्रिः सन्ध्ये च धर्मश्च वृत्तज्ञाः सर्वदेहिनाम् (VIII, 86)
१७. एकोऽहमस्मीत्यात्मानं यत्त्वं कल्याण मन्यसे नित्यं स्थितस्ते हृद्येषः पुण्यपापेक्षिता मुनिः । (VIII, 91)

१८. पिताऽऽचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः नादण्ड्यो नाम राज्ञोऽस्ति यः ग्वधर्मे न तिष्वति । (VIII, 335)
१९. अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य वेक्षणे । (IX, 11)
२०. प्रजनार्थ महाभागाः पूजार्हा गृहदीप्तयः स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन । IX, 20)
२१. एत्तावानेष पुरुषो यज्जायात्मा प्रजेति ह विप्राः प्राहुस्तथा चैतद्यो भर्ता सा स्मृताङ्गना । (IX, 45)
२२. देवदत्तां पतिं भार्या विन्दते नेच्छयात्मनः तां साध्वीं बिभृयान्नित्यं देवानां प्रियमाचरन् । IX, 95
२३. स्वाम्यमात्यौ पुरं राष्ट्र कोशदण्डौ सुहृत्तथा.. सप्त प्रकृतयो ह्यताः सप्ताङ्ग राज्यमुच्यते । (IX, 294)
२४. मानसं मनसैवायमुपभुङ्क्ते शुभाशुभम् वाचा वाचा कृतं कर्म कायेनैव च कायिकम् । (XII,8)
२६. सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् तद्व्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः । (XII, 85)

श्रीमद्रामायणम्

१. कोन्वस्मिन्साम्प्रतं लोके गुणवान् कश्च वीर्यवान् धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ।
२. चारित्रेण च को युक्तः सर्वभूतेषु को हितः विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः ।

३. आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे । (124)

४. अहं ते प्रतिजानामि हतौ तौ विद्धि राक्षसौ अहं वेद्मि मद्दात्मानं रामं सत्यपराक्रमम् । 1 19, 14

५. वसिष्ठोऽपि महातेजा। ये चान्ये तपसि स्थित्ताः । 11 9,14 यदि ते धर्मलाभं व यशश्च परमं भुवि (1119,15)

६. तपोमयं तपोराशि तपोमूर्ति तपात्मकम् तपसा त्वां सुतप्तेन पश्यामि पुरुषोत्तमम्

७. शरीरे तव पश्यामि जगत्सर्वमिदं प्रभो त्वमनादिनिद्द श्यस्त्वामहं शरणं गतः । 1, 29, & 12

८,१६. नात्मनः कामकारोहि पुरुषोऽयमनीश्वरः

इतश्चेतरतश्चैमं कृतान्तः परिकर्षति सर्वे क्षयान्ता निचया पतनान्तास्समुच्छ्रयाः संयोगा विप्रयोगान्ताः मरणान्तं च जीवितम् यथा फलानां पक्वानां नान्यत्र पतनाद्भयम् एवं नरस्य जातस्य नान्यत्र मरणाद्भयम् यथागारं दृढस्थूणं जीर्ण भूत्वाऽवसीदति तथाऽवसीदन्ति नरा जरामृत्युवशंगताः अत्त्येति रजनी या तु सा न प्रतिनिवर्तते यात्येव यमुना पूर्णा समुद्र' लवणार्णवम् अहोरात्राणि गच्छन्ति सर्वेषां प्राणिनामिह आयूंषि क्षपयन्त्याशु ग्रीष्मे जलमिवांशवः आत्मानमनुशोच त्वं किमन्यमनुशोचसि आयुस्ते हीयते यस्य स्थितस्य च गतस्य च यथा काष्ठं च काष्ठ च समेयातां महोदधौ समेत्य च व्यपेयातां तद्वद्भूत समागमः वयसः पत्तमानस्य स्रोतसो वानिवर्तिनः आत्मा सुखे नियोक्तव्यः सुखभाजः प्रजाः स्मृताः

II, 105, 15 to 23

१७. अधिरोद्दाऽर्य पादाभ्यां पातुके द्देमभषिते

ते दिसलोबश्य योगक्षेमं विधारयतः । (11,112, 21)

18. रूपसंहननं लक्ष्मीं सौकुमार्ये सुवेषताम् ददृशुविस्मिताकाराः रामस्य वनवासिनः । (III,1,13)

19.. न्यस्तदण्डा वयं राजन् जितक्रोधा जितेन्द्रियाः रक्षितड्या स्वया शश्वद् गर्भभूतास्तपोधनाः । III, 1,21

20. अय मे सफलं जन्म स्वर्गश्चैव भविष्यति त्वयि देववरे राम पूजिते पुरुषर्षभ । (III, 74, 12)

21. निवासवृक्षः साधूनामापन्नानां परा गतिः आर्तानां संश्रयश्चव यशसश्चैकभाजनम् । (IV,15,19)

22.0रक्षिता स्वस्थ वृत्तस्य स्वजनस्य च रक्षिता रक्षिता जीवलोकस्य धर्मस्य च परन्तपः

23. सर्वलोकशरण्याय राघवाय महात्मने निवेद्यत मां क्षिप्रं विभीषणमुपस्थितम्

24. सकृदेव प्रपन्नाय तवास्मीति च याचते अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम

25. मत्कथाः प्रचरिष्यन्ति यावल्लोके हरीश्वर तावद्रमस्व सुभीतो मद्वाक्यमनुपलायन् । (VI, 108, 36)

(३) महाभारतं

पाराशर्यवचस्सरोज ममलं गीतार्थगन्धोत्कर्टं नानाख्यानककेसर हरिकथासद्भानुना बोधितम् ।

लोके सज्जनपट्पदैरहरहः पेपीयमानं मुदा भूयाद्भारतपङ्कजं कलिमलप्रध्वंस नः श्रयसे ॥१

नमो धर्माय महते नमः कृष्णाय वेधसे ब्राह्मणेभ्यो नमम्कृत्य धर्मान् वक्ष्यामि शाश्वतान् ।२

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् देवीं सरस्वतीं व्यासं वतो जयमुदीरयेत् । ३

यत. कृष्णस्ततो धर्मः यतो धर्मस्ततो जयः ।४

युधिष्ठिरो धर्ममयो महाद्रु सः स्कन्धोऽजुना भीमसेनोऽस शाखा

माद्रीसुतौ पुष्पफले समृद्ध मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च । ५

यथा समुद्रोऽतिमहान् यथा च हिमवान् शिरः

ख्यातौ रत्नाकरं तद्वन्महाभारतमुच्यते । ६

य इहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् । ७

भरतान् भारती कीर्ति र्येनेदं भारतं कुलम् अपरे ये च पूर्वे च भारता इति तेऽभवन् ८

योऽभ्यस्यवेदांश्चतुरस्तपसा भगवानृषिः लोके व्यासत्वमापेदे काष्णर्यात्कृष्णत्वमागतः ॥६

अतिक्रान्तसुखाः कालाः प्रत्युपस्थितदारुणाः शश्वत्पापीयदिवसाः पृथिवी गतयौबना ।१०

शंखचक्रगदापाणे द्वारकानिलयाच्युत गोविन्द पुण्डरीकाक्ष रक्ष मां शरणागताम् ।११

हा कृष्ण द्वारकावासिन् क्वासि यादवनन्दन इमामबस्थां संप्रानामनयां त्रातुमर्हसि ।१२

मोहजालस्य योनिर्हि मूडैरेव समागमः अहन्यहनि धर्मस्य योनिस्साधुममागमः ।१३

अमतां दर्शनात् स्पर्शात् संभाषणसहासनात् धर्माचाराः प्रहीयन्ते न च सिद्धयन्ति मानवाः । १४

न जातु कामः कामानामुपभोगेन शाम्यति हविपा कृष्णवर्त्मेव भूय एवाभिवर्धते । १५

यत्पृथिव्यां ब्रीहियचं हिरण्यं पशवः स्त्रियः एकस्यापि न पर्याप्तं तस्मात्त ष्णां परित्यजेत् ।१६

आत्मनः प्रतिकूलानि परेषां न समाचरेत् *न तत् परस्य कुर्वीत यद्यदात्मनि नेष्यते । १७

अहन्यहनि भूतानि प्रविशन्ति यमालयम् शेषाः स्वावरमिच्छन्ति किमाश्चर्यमितः परम् ।१८

एष मे सर्वधर्माणां धर्मोधिकतमो मतः यद्भक्त्य पुण्डरीकाक्षं स्तवैरर्चेन्नरस्सदा । १६

श्रीराम राम रामेत्ति रमे रामे मनोरमे सहस्रनामतत्तुल्यं रामनामवरानने । २०

योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ।२१

पूर्वे वयसि तत्कुर्याद्यन वृद्धस्सुखं ब्रजेन् यावज्जीवं तु तत्कुर्याद्यन प्रेत्य सुखं व्रजेत् । २२

हर्षस्थानसहस्राणि भयस्थानशतानि च दिवसे दिवसे मूढमाधिशन्ति न पण्डितम् ।२३

ऊर्ध्वबाहुर्विरौम्येतन्न च कश्चिच्छृणोति माम् धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते । २४

न जातु कामान्नभयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतों. धर्मो नित्य स्सुखदुःखेत्वनित्ये जीवो नित्यो हेतुरस्य त्वनित्यः ।२५।

(भारत्तसावित्री)

[४] श्रीमद्भागवतम्

जन्माद्यम्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य अदिकवये मुह्यन्ति यत्सूरयः तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा धाम्ना स्वेन निरस्तसर्वकुहकं सत्यं परं धीमहि ।१

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सत्तां

बेद्य’ बास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरो सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात ॥२

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुत्तम् पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः । ३ (I, 1 to 3)

वासुदेवे भगवति भक्तियोगः प्रयोजितः जनयत्याशु वैराग्यं ज्ञानं यत्तद्द्वैतुकम् ।४

नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् । ५

आत्मारामाश्च मुनयो निर्मन्था अप्युरुक्रमे कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो इरिः । ६

पुनश्च भूयाद्भगवत्यनन्ते रतिः प्रसंगश्च तदाश्रयेषु महत्सु यां यामुपयामि सृष्टि मैत्र्यस्तु सर्वोऽत्र नमो द्विजेभ्यः । ७

तदश्मसारं हृदयं बतेदं यद्गृह्यमाणै र्हरिनामधेयैः

न विक्रियेताथमुखे विकारो नेत्रे जलं गात्ररुद्देषु हर्षः । ८ II,3,25

नैकात्मतां मे स्पृहयन्ति केचिन्मत्पादसेवाभिरता मदीहाः

योऽन्योन्यतो भागवताः प्रसज्य सभाजयन्ते मम पौरुषाणि ।६

(III, 25, 34)

सालोक्यसाष्टिसामीप्यसारूप्यकत्वमप्युत्त दीयमानं न गृहणन्ति विना मत्सेवनं द्विजाः ।१० (III, 29, 13,

यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम् हित्वाचा भजते मौढ्याङ्गत्मन्येव जुहोति सः । ११

(III, 20, 22) अहं ब्रह्मा च शवंश्च जगतः कारणं परम् । १२

(IV 7,50) न नाकपृष्ठ' न च पारमेष्टयं न सार्वभौमं न रसाधिपत्यम्

न योगसीद्धीर पुनर्भवं वा समञ्जसा त्वा विरहस्य कान्ते ।१३ (VI, 11, 25)

तस्माद्गोविन्दमाहात्म्यमानन्दरससुन्दरम् शृणुयारकीर्तयेन्नित्यं स कृतार्थो न संशयः ।१४ (VII, 1, 2) श्रवणं कीतनं विष्णः स्मरणं पादसेवनम् अचेनं वन्दनं दास्यं सख्यमात्मनिवेदनम् । १५

तप्यन्ते लोकतापेन साधवः प्रायशो जनाः परमाराचनं तद्धि पुरुषस्याविलात्मनः । १६ (VIII, 7, 44)

धर्माय यशमेऽर्थाय कामाय स्वजनाय च पञ्चधा विभजनन्वित्तमिहामुत्र च मोदते । १७

VIII, 1937) न कामयेऽहं गतिमीश्वरात्परामष्टर्धियुक्तामपुनर्भवं वा आर्ति प्रपद्ये ऽखिल देह भाजामन्तःस्थितो येन भवन्त्यदुःखाः ।१८ (1X 21, 12)

अहो भाग्यमहो भाग्यं नन्दगोपत्र जौकसाम् यन्मित्रं परमानन्दं पूर्ण ब्रह्म सनातनम् । १६ (X, 14 32)

एतावजन्मसाफल्यं देहिनामिह देहिषु प्राणैरथैर्निया वाचा श्रेय एवाचरेत्सदा । २० (X, 22, 35)

तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः तद्गुणानेव गायन्त्यो नाध्मागाराणि सस्मरुः । २१ (X, 30, 43)

भक्तिः परेशानुभवो विरक्तिरन्यत्र चैवत्रिक एकपालः प्रवद्यमानस्य यथाश्नत स्युम्तुष्टिः पुष्टिःक्षुदपायोनघासम् ।२२ (XI, 12, 42)

निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु तेष्वनिर्विण्णश्चित्तानां कर्मयोगम्तु कामिनाम । यद्दच्छया मत्कथाद। जातश्रद्धस्तु यः पुमान्

[11:40 pm, 02/05/2024] Gargi Shirgaonkar: निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ।२३, २४ (XI, 20, L, 8)

न ते मय्यच्युतेऽजे वा भिदामण्वपि चक्षते । २५ XII, 10, 22)

9911

(५) सर्वगीतासारः

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ।१ (गुरुगीता)

हरो यद्युपदेष्टा ते हरिः कमलजोऽपि वा तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते । २ (अष्टावक्रगीता)

ईश्वरानुग्रहादेव पुंसामद्वं तवासना महद्भयपरित्राणाद्विप्राणामुपजायते ॥३ (अवधूतगीता)

इन्द्रियाणि तु संहृत्य मन आत्मनि धारयेत् तीव्र तप्त्वा तपः पूर्व मोक्षयोगं समाचरेत् ॥४ (अनुगीता)

नाहं तरंगः सलिलमहमित्येव युक्तितः बुद्ध येन तरंगेन कुतस्तस्य तरङ्गता ।।५

(ब्रह्मगीता)

ब्रह्मणां कोट्यो याताः गताः सर्गपरम्पराः प्रयाताः पांसुवद्भूपाः का धृत्तिर्मम जीविते ॥६ (जनकगीता)

विश्वं यदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्य' न हि किंचिदान्तरम् ॥७ (रामयीता)

यस्मिन् सर्व यस्य सर्व यतः सर्व यस्मै त्विदम् येन सर्वं यद्धि सर्व तत्सत्यं समुपास्महे ॥८ (सिद्धगीता)

ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः

(पलालमिव धान्यार्थी त्यजेद्‍ ग्रन्थानशेपतः ॥६ (उत्तरगीता)

अलमन्यैः परिज्ञानैर्वाच्यवाचकविभ्रमैः अनहं वेदनामात्रं निर्वाणं तद्‌विभाव्यताम् ॥१० (वसिष्ठगीता)

अकुलानां कुले भावं कुलीनानां कुलच्क्षयम् संयोगं विप्रयोग च पश्यन्ति चिरजीविनः ॥११ (बकगीता)

दानं स्वधर्मो नियमो यमश्च श्रतं च कर्माणि च सद्‌मतानि सर्वे मनोनिग्रहलक्षणान्वाः परो हि योगो मनसः समाधिः ॥१२ (भिक्षुगीता)

न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक् विखनसार्थितो विश्वगुप्तये सख उद्‌देयिवान् सात्वतां कुले ।।१३ (गोपिकागीतं)

देहं च नश्वरमवस्थितमुत्थितं वा सिद्‌धो न पश्यति यतोऽध्यगमत्स्वरूपम् दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदान्धः ॥१४॥ (हंसगीता)

एकाकी रमते नित्यं स्वभावगुणर्विजतः ब्रह्मज्ञानरसास्वादी जीवन्मुक्तः स उच्यते ।।१५ (जीवन्मुक्तगीता)

एतद्‌वै श्रद्‌धया भक्त्या योगाभ्यासेन नित्यशः समाहितात्मा निस्संगो विरक्त्या परिपश्यति ॥१६ (कपिलगीता)

चन्द्रहीना यथा रात्री रविहीनं यथा दिवम् नृपहीनं यथा सैन्यं गुरुद्‌दीनस्तथा नरः ॥१७ (नारदगीता)

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव । त्वमेव विद्‌या द्रविणं त्वमेव त्वमेव सर्व मम देवदेव ॥१८ (पाण्डवगीता)

हरिहरति पापानि दुष्टश्चित्तैरपि स्मृतः अनिच्छन्नपि संस्पृष्टे दद्‌दत्येव हि पावकः ॥१६ महत्सेवां द्‌वारमाहुर्विमुक्तेः तमोद्‌वारं योषितां संगिसंगम् महान्तस्ते समचित्ताः प्रशान्ताः विमन्यवः सुहृदः साधवो ये ॥२० (ऋपभगीता)

न हि ज्ञानविरुद्‌ध षु बहुदोषेषु कर्मसु श्रेयाघातिषु सज्जन्ते बुद्‌धिमन्तो भवद्‌विधाः ॥२१ (शौनकगीता)

त्वमकरणः स्वराडखिलकारकशक्तिधरः तव वलिमुद्‌धहन्ति समदन्त्यजयाऽनिमिषाः वर्षभुजोऽखिलक्षितिपतेरिव विश्वसृजो विद्‌याति यत्र ये त्वधिकृता भवतश्चकिताः ॥२२ (श्रुतिगीता)

दर्शनीयतिलको वनमालादिव्यगन्धतुलसीमधुमत्तैः

अलिकुलैरलघुगीतमभीष्टमाद्रियन् हि संन्धितवेणुः । २३

वेणुगीता कुशलः सुखदुःखेषु साधू श्चाप्युपसेवते तस्य साधुसमारंभाद्‌ बुद्‌धिधर्मेषु जायते ॥२४

(व्याधगीता) धन्यानामुत्तमं दादयं धनानामुत्तमं श्रुतम् लाभानां श्रय आरोग्यं सुखानां तुष्टिरुत्तमा ॥२५ (mयुधिष्ठिरगोता)

गुरुदेव शिवानन्दप्रमाणवाक्यानि

(दशोपनिषत्)

(१) योगसारोपनिषत्

तलधारावदनुसंधाननैरन्तर्य ध्यानम् ।।१ समाधिद्विविधः, संप्रज्ञातोऽसंप्रज्ञातश्चेत्ति ॥२

(२) वेदान्तसारोपनिषत्

नायमात्मा विवादेन लभ्यः न वैदुष्येण न बुद्धचा न बहुश्रुतेन । स एवैनं लभते यस्य प्रसन्नं मनः, येन निगृहीतानीन्द्रियाणि, यश्च नित्यं प्रणिधानयुक्तः ॥३ यस्तु मुमुक्षुः सन्नुच्चैर्यव्र्व्यवसितेन मनसा सत्संकल्पः सदाचारो विशुद्धशीलः संयतेन्द्रियः शान्तो दान्तः स दीर्येणाविच्छिन्नेन प्रणिधानेन ब्रह्म समश्नुते ।।४

(३) शिवज्ञानामृतोपनिषत्

तद्ब्रह्म स सच्चिदानन्दस्वरूपं स्वयंज्योतिर्नित्यं अनाद्यन्तं निर्विकारं अमृतं अभयं निरञ्जनम् ॥५

ओमित्यष्टप्रणवा ब्रह्मणः प्रतीकः, वीर्यवच्चैतस्योच्चारणं औंकारादेव प्रपञ्चः संवृत्तः । औंकारे प्रतितिष्ठति । औंकारे च लीयते महाप्रलये । औंकारश्चतुर्णा वेदानां सारभूतः ॥६

(४) अद्वैतामृतोपनिषत्

एकमेवाद्वितीयं ब्रह्मामृतमखण्डचिदानन्दाकारं निरपेक्षं परिपूर्णम् ॥७

सच्चिदानन्दनित्य परिपूर्णोपाख्यं पञ्चलक्षणं ब्रह्म विद्यात् । ध्यायन्निमानि विशेषणानि ।।८

(५) स्वरूपबोधोपनिषत्

निजरूपेऽवस्थितो महात्मा निरन्तरमात्मनि रममाणः आत्मानन्ददभरितः सवत्र समदृष्टिरभकवत्क्रीडन् जातरूपः परिभ्रमत्ति ॥६

निरन्तरेण ध्यानेन विशोधिते मनसि ब्रह्मणि विलीने निर्विकल्पसमाधिना ब्रह्मणस्तत्त्वं स्पष्टतया निःसंशयं चानुभूयते । तम्माद्धा परमाद्वैत ब्रह्मज्ञानानन्दानुभवः ॥१०

(६) ब्रह्मरहस्योपनिषत्

सर्वदुःखात्यन्तनिवृत्तिर्मोक्षः परानन्दप्राप्तिश्च । मुक्तिरात्मबोधात् परिणमत्ति ॥ ॥११ स एव ब्रह्माभ्यासः तदेव यदभीक्ष्णं चिन्तयति, तदनुध्यार्यात, तत्कथयति. तद्विवृणोति तस्मिन् निमग्नो भवति ॥१२

(७) ब्रह्मानुभवोपनिषत्

सच्चिदानन्दस्वरूपोऽहं भूमानन्दस्वरूपोऽहम् । ज्योतिःस्वरूपोऽहं शान्तिस्वरूपोऽहं ॥१३ नित्यशुद्धस्वरूपोऽहं । नित्यबोधस्वरूपोहम् नित्यमुक्तस्वरूपोऽहं । नित्यतृप्तिस्वरूपोऽहं नित्यविज्ञानस्वरूपोऽहं । नित्यचैतन्यस्वरूपोऽहं ।।१४

(८) विचारबिन्दूपनिषत्

धर्माधर्मौ, सुखदुःखे च सौम्य मनसः संभवतः । न त्वदीये । त्वंचन कर्ता न भोक्ता । त्वमसि तत्त्वतः स्वतन्त्रः । अहं कर्ता अहं भोक्ता इति भावं त्यक्त्वा सुखी भव ।।१५ आत्मविद्यो जीबन्मुक्तः स सर्वास्ववस्थासु शान्तः स सर्वथा निःस्पृहः ।

सर्वत्रानासक्तः स शिशुरिव सञ्चरति । देहे निधू ताहंभावस्य तादृशस्य कुतः आसक्तिरनासक्तिर्वा ।।१६

(६) ज्योतिर्विन्दूपनिषत् सप्तकोटिमन्त्राणां मध्ये अहं ब्रह्मास्मीत्ययं मन्त्रः श्रेष्ठः । मन्त्रमेनमावर्तयन् सद्यो मोक्षमाप्नोति । नात्र स्वल्पोऽपि संशयः ।।१७ मन एव मनुष्याणां बन्धमोक्षयोः हेतुः रजस्तमोभ्यामभि- भूतं मनः वन्धाय कल्पते । सत्त्वसमृद्ध मनः मोक्षाय कल्पते ।।१८

(१०) आनन्दबिन्दूपनिषत् आनन्दस्वरूपं ब्रह्म । आनन्दमयं आनन्दद्धनं । आनन्दमूति । आनविग्रहं आनन्दसागरं । निरतिशयानन्दं परमानन्दं । अनन्तसुखं । नित्यसुखं अखण्डसुखम् ।।१६ अहंभावाभावे मोक्षः । अहंभावसत्त्वे बन्धः । ममकारेण मनुष्यो बध्यते । त्यक्तममकारो मुच्यते ॥२०

मोक्षगीता मा भैषीर्वत्स ते नास्ति तत्त्वतो मरणं ध्रुवं । उपायश्चास्ति संसारोत्तरणे तरणिर्यथा ॥२१ यथात्मनः कृमिः कोशे बध्यतेऽन्तस्तथा नरः संसाराख्यमहाजाले संकल्पैर्वासनागणैः ।।२२ विशोध्यते यथा हेम पावकेन तथा मनः ध्यानाग्निना हि निर्दग्धं निर्मलं तात जायते ॥२३ समदृष्टया विवेकेन सत्संगेन स्थिरेण च चित्तेन तद्विचारेण सुलभं परमं पदम् ॥२४ त्वमानन्दमयः साक्षात् पुरुषो ब्रह्मचिन्मयं ज्योतिर्मयस्त्वमात्मा च बुध्वेदं भवमुक्तिभाक् ॥२५॥

अमृतहृद इव अवगाढोऽस्मि

भारत-वर्षस्य. सनातनवैदिकसंस्कृतेश्च शीर्षस्थानेऽवस्थितः तत्रभवतो भगवतः शिवानन्दस्य आश्रमः ध्रुवं शिवस्यैव आनन्दस्यापि आश्रम एवेत्यत्र न संशयः । न केवलं नाम्ना, अपितु मनोहरनिसर्गबिनततपस्विजनसहकृतपरिसरपरिस्थित्या, लीलया च सर्वमिदं पुण्यस्थानं आनन्दमयं च विभाति । सर्वोऽप्यानन्द एव । कश्चन आनन्दः शिवसहकृतः, अपरः शान्तसहकृतः, कश्चित् हृदयसहचरः अन्यः चिदनुसृतः । एवमेव सर्वोऽप्ययमाश्रमः सच्चिदानन्दस्वरूपतां अभिनेतुमिव यथार्थं प्रवृत्त इवाभाति । एतेषु यतिवरेषु एकतमः

ज्ञानानन्दः, विशेषतो ज्ञानी, गुरुभक्तः, गीर्वाणवाणीविलसत्प्रतिभः, सुललितकविः स्वज्ञानेन सर्वेषामानन्ददो बोभूयते।

उन्नतस्य तरोस्तलमाश्रित्य गुल्माः, तृणानि च यथा क्षीणतामेवोपसंपद्यन्ते, तथैव उन्नतं उच्चं च पुरुषमुपाश्रितः सामान्यो जनोऽपि क्षीयत एवेति लौकिकी गाथा प्रतिभाति। तथापि औन्नत्यं महत्वात् भिन्नं हि। यत्र औन्नत्यं कनीयसां धातकं इति प्रथितं तत्र अल्पमपि महान्तमापादयत् महत्वं औन्नत्यात् विशिष्यते। महान्तं पुरुषमाश्रित्य न कश्चित् अल्पतमोपि खिद्यते, प्रत्युत दिने-दिने उन्नतमेव पन्थानमारोहति एवं सति प्रतिभासम्पन्नानां प्रज्ञानां महनीयमेधसां किं वक्तव्यम्। ईंटश एव प्राज्ञः प्रतिभाभासितः महनीयः सरस्वतीत्युपाद्धः ज्ञानानन्द्राख्यो यतिवरः महान्तं प्रभु शिवानन्दमाश्रित्य दैवीं वाचमाराधयन् प्रत्यहं वर्धिष्णुः भ्राजिष्णुश्च विलसति।

अस्मिन् मद्दीयसि यत्तौ या प्रगाढा गुरुभक्तिः, पामरजनानुकम्पा च विद्यते, तस्या एव प्रतीकरूपात्मिका शियानन्द-

सुप्रभाताख्या काचित् कृतिः कवेः प्रतिभावैचित्र्यं विकिरन्ती ह्रदयाह्लादकारिणी प्रकाशते।

गुरुः शिवानन्दः। ज्ञानानन्दः गुरुह्रदयेन साकमेकात्मतामापन्नः, गुरोः ह्रदूङ्गतं सार-सर्वश्वमात्मसात्कुर्वाणः सहचरः अन्तेवासी। असौच अन्तेवासी तृप्रकामः महान्तं आनन्दमनुभवति। तस्य ह्रदयतलात् गुरुगुणगु फिता अबाधगतिका गीर्वाणगीतिकासरणिः निःसरति। अन्याद्दशः सः भावनावाणीसंयोगः। तत्रत्यं कवितामाधुर्य, भावसौष्ठवं. ज्ञानगांभीर्य समलंकृतशब्दस्वारस्यं च अनुभवैकवेद्यम्।

शिवानन्दप्रभोः गुणवर्णनेन सा कृतिरारभ्यते। गुरुस्तुति मारव्धुकामः कविः किचित् दिङ्यूढतामिव उपयाति। गुरुरलौकिकः पुरुषः। तदीया गुणा लौकिका अप्यलौकिकाः। मानुषी भाषा, मानुषी वाणी कथं वा तान् उपगातु समर्था स्यात्। तां गुणपरंपरां सुव्यक्तं अर्थभारमसहमानया वाचा वर्णयितु' असांप्रतमेव स्यात्। अतएव कविः स्तौति –

भवत्कीर्तिगानप्रवीणा विहंगाः स्तुवन्तो भवन्तं डयन्ते निशान्ते।' तथा ब्योमगंगेयं, ध्रुवं स्तौति वीचिप्रणादैः भवन्तम्॥'

वाचामगोचरं तं गुरुयशःस्तोमं विहंगमानां अव्यक्तमधुरनिनादैः कलकलतरंगाणां अनवरतमर्मरे सुगतिमाकलयन् कविः किंचिदाश्वस्तो भवति।

स्थाने खल्विदं विहंगम-वीचिप्रभृतीनां गानम्? यतो मानवः

यावत्पर्यन्तं जीवति तावत्पर्थन्तमेव मानवत्तापरिच्छिन्नः।

मानवतामुत्क्रांतः परब्रह्वासाम्यमापन्नः मानवः चर्मचक्षुष्मतां

ज्ञानवः सन्नपि वस्तुतः अमानव एव। किं बहुना स तु साक्षात् विभुतायुक्तः प्रभुरेव। तस्य विभोः यशोगाने न केवलं मानवाः किन्तु पशुपक्षिकीटपतंगादयः, बननदीगिरिवाय्वादयः सर्वेपि तुल्याधिकारसंपन्ना एव।

अत एबोत्प्रेक्षितं कविना-

भवन्तं मुद्दा सेवितु' शीतबातो नितान्तं मन्दं समायाति । भवन्तं मुदा द्रष्टुमौत्सुक्यवन्तः

स्तुवन्तीव कूजन्ति हृष्टाः शकुन्ताः ॥

दशमश्लोके तु प्राभातिकं नैसर्गिकं तारावैवण्य, अवश्यायपातं च तत्रभवतो भगवतः दर्शनालाभशोककारणजन्येन मुखवैवर्ण्यत्वेन, बाष्पमोचनत्वेन च उत्प्रेक्षमाणस्य कवेः अहो खलु किं कवित्वम् ।

इतरस्मिन् श्लोके अरुणोदयकालिकं अरुणिमानं विवस्वतः दिनश्रियाश्च उद्वाहकालिकवैश्वानरत्वेन उत्प्रेक्षमाणस्य कवेः उडुगणः पाण्डुतामापन्नः लाजहोमकालिकलाजालिरिव भाति इतीयं कल्पनाचातुरी सुतरां समीचीनैव ।

एकत्र या शोभा दिशान्तेषु निशारण्यदावाग्भितुल्या निकाममारक्ता भातिः सैव इतरत्र प्रभातार्कशोणांशुलिप्ताब्दजालवितानमिव विभाति ।

संसारे कुत्रचित् कश्चन भषभारर्चितातंतुसंतानसंदानितान्तःकरणः दैन्यभारजर्जरितसर्वागः सकलानुदीच्क्षते, तदैवान्यत्र कश्चन मुक्तातपत्रप्रचलमणिघणत्कारमौलिः दृप्यहन्तावल इव क्षोणिपालः कंचन न गणयति । इन्त, विधिधिलसितम् । एतामेव नियतिविडम्बनामाचिख्यासुरिव कविः

तारागणस्य शोकाकुलबाष्पमोचनसमये एव लाजहोमपूर्वक विवश्वद्दिनश्रीविवाई वर्णयन् संसारस्य असारतां ध्वनयति । भवक्लिष्टलोकान् अवतः प्रभोः शिवानन्दस्य सुप्रभातगानव्वौ अयं काव्यध्वनिः सुसंगत एवेति न पुनर्वक्तव्यम् ।

कविः सप्तमश्लोके गुरु अभीशुप्रदीप्तांगं तापापहारित्वेन स्तौति । विशालावबोधं प्राप्तत्य अयमेव खलु विशेषः यत् ताप-न पादनत्वे कारणीभूता प्रदीप्तता तापापहारमुपसंपादयति इति । प्राप्तापरोक्षानुभूतेः शिवानन्दगुरोः सारगर्भिता इयं श्लाघा करे ज्ञानगरिमाणमेव प्रकटयति ।

चत्वारिंशच्छलोकात्मिकायामस्यां लधीयस्यां अपि कृतौ अन्तेवासिप्रवरेण विरचितायां गुरोः एकोऽपि गुणः अवर्ण्यतां न लेभे । तस्य ज्ञानकर्मभक्तियोगयोगत्वं, विद्या, धन, ज्ञान, कृपादातृत्वं, भवातंकविच्छेदकारित्वं, तमःस्तोमकान्तारनिमूलकत्वं, पुराणेविहासज्ञत्वं, पुण्यापुण्यद्रष्टृत्वं, दिव्याकृतित्वं, अपेताशत्वं इत्यादि सर्वमेव वैशिष्ट्यजातं उपमाश्लेषोत्प्रेक्षालंकारभूयिष्ठया भाषया ललितपद्यविन्यासपूर्वकं उपवणितम् ।

यत्र तत्र शब्दालंकारेणापि समलंकृता कविताकामिनी, विशेषतः द्वितीयाक्षरप्रासेन नवीनेनाभूषणेन ध्याभषिता गीर्वाणवाणीकविता लोके नितरामेव शोभते ।

भगवतः शिवानन्दस्वामिनः व्यक्तितत्वं न केवलं तस्य ऐकत्स्यैव पुरुषस्य व्यक्तितत्वम् । अत्रत्यानां तपस्विनां यतीनों विविध कार्यत्रसक्तानां, अनासक्तानां अंतेवासिनां यत् संयुक्तं व्यक्त्विं तदेव स्वामिनः शिवानन्द्रस्य

व्यक्तित्वम् । अयं एतस्य आश्रमस्य विशेषः। यतः एक एवं शिवानन्दगुरुः महनीयेन स्वमद्दसा वैविध्यत्तामापनायां भाश्रमप्रवृत्तौ चकारते ।

इममेव विशेषं अभिविवक्षुणेव कविना अत्रत्यानां अनेकेषामन्तेवासिनां कृष्णानन्द, हृदयानन्दप्रभृतीनां अभिधानोल्लेखपूर्वकं, कर्मयाथातथ्यवर्णनपूर्वकं यत्सुप्रभातमाकांक्षितं तत् स्थाने एव ।

किं बहुना सविलासमाकलय्य नितरां हृष्यते नश्चेतः । कविरयं प्राज्ञः, ज्येष्टः श्रेष्ठश्च, अयं जनस्तु पामरः, अल्पः, लघीयान् । कथं वा धन्यवादानर्पवितुमहं समर्थः इदमेव केवलं विवचे, यत् गुणगण समवेतं, ज्ञानगुरुमपि नितरां विनतं सरश्वत्याराधकं कविं, तस्येमां अन्यादृशीं कृतिं च अवलोक्य अमृतहृद इव अवगाढोऽस्मि । ज्ञानानन्दसरस्वतीसरस-सरस्वतीविलासं

इति विनतः (ति० न० आत्रेय) काशी

F भवदीयं शिवानन्दसुप्रभातमवलोकितं । अतीव सुगर्भ पुष्टार्थकं गम्भीराशययुक्तं रस्यं च वर्तते । इति मदीयमाशय निर्व्याजं प्रकटयामि ॥१

किञ्च तोटकाचार्यमनुकृत्य रचिता शरणार्गातस्तुतिरतीव हृद्या ॥२

शिवानन्दमङ्गलं नसर्गिकद्वितीयाक्षरप्रासमण्डितं गुरुदेवगुणमहिसप्रकाशकं पठितृणां गुरुभक्तिस्फोरकं च वरीवर्ति । नितरां श्लाघामर्हति ।।३

पञ्चचामरपरिष्कृतं

- शार्दूलस्रग्धरादिप्रथितं शिवानन्द-

स्तोत्रं ।।४

शिवानन्दध्यानाष्टकं – मालिनी मल्लिकाकुसुम मञ्जरीपृथ्वी-

प्रभृतिभिर्विविध वृत्तै निर्वर्तितं भृशं हृदयङ्गमत्वं भजते ।।५ अन्तेऽपि सुप्रभातपर्यवसायित्वेन निबद्ध पद्यसप्तकमपि विद्वद्भिः प्रशस्यत्वं सन्दौंचियं चावगाइते ।।

गुरुमहाराजस्य पूर्णानुग्रहभाजनानि प्रशस्तशिष्यभक्ताश्चावश्यं सन्दर्भेऽस्मिन् सुप्रभाते स्मरणीयाः । अहो भवतां कवितीचित्यं । अवश्यवक्तव्यवचनचातुर्य च कथं वर्ण्यते ।।६

१. बुधवरपरिषद्व्योम्नि औंकारानन्दः
२. मुद्रणागारनाथः अमरानन्दः
३. प्रवचननिपुणः सर्वदा गुरुपादसेवी वेङ्कटेशानन्दः
४. मनोहारिगद्यप्रणेता पटुतरधिषणः श्रीशिवप्रेमानन्दः
५. शिष्यप्रकर परिवृढः सुविदितपरमानन्दनामा

६. नानालोकप्रहितलेख्यजालसंक्षेपकः शान्तगंभी रहृदयः मौनानन्दः

७. वेश्मनिर्माणदक्षः उदारशीलः माधवानन्दनामा इति एते त्वां द्रष्टुकामाः परिचलन्ति सद्गुरो शिवानन्द ते सुप्रभातं इति सप्तर्षीणामिव सप्तानां भक्तशिष्याणां मानसिकगुणतल्लजावेदनपूर्वकं तेषां प्रत्यूषे सद्गुरुपादाम्बुजसन्दर्शनौ सु क्येन तत्प्रतीक्षणव्यग्रतां प्रकटयता भवता साधु कृतं समर्थितं च । सर्वथा कृतार्थो भवान् ॥

ज्ञानभास्करः महोपाध्यायः एस् गोपालशास्त्री स्यानन्दूरपुरम्

VOICE OF THE DEVOTEES

For sometime I have been praying for guidance -that I would be shown the right way to worship God. Last week I was in a book store and picked up two books, one is by Pierce Gervis entitled: “Naked They Pray” and the other “Concentration and meditation” by Swami Sivananda. As I read “Naked They Pray”, I became very excited or I should say filled with a kind of joy. Reading about Swamiji, I just knew it must be about Swami Sivananda. The book did not mention the name. I feel that the way for me lies eventually at Rishikesh. Somehow I feel that I will find myself at Sivananda Ashram. I know it is difficult to say much in letters unless one knows the person. But I feel that this letter will help me keep my aim uutil at last I am able to come to you.

-Sri John Harrington McDonnell, Hammond, Indiana, USA.

It was a real joy to receive your letter, I feel that I have been led to you. Be my Guru, I will try to be a real disciple. Though the distance between us is great, perhaps a real connection can be established. I read your book: ‘Concentration and Meditation’ along with ‘Naked They Pray’ by Gervis, in which he wrote about you. Then I bought Complete Illustrated Book of Yoga by Swami Vishnudevananda. I discovered that you were his Guru. I feel this points me to you. You can help me. Some people seem to find their own way, but I think 1 must learn from one who knows the Truth.

-Sri John McDonnell, Hammond, Indiana, USA.

All your devoted admirers and loving disciples of Greenwood Park are striving to put into practice your divine teachings. Devotees who visited your Ashram write to me in very glowing terms the wonderful treatment meted to them at the Ashram. They are greatly impressed by the work done at the Ashram. After hearing these reports I sit and think of the time when the Lord will grant me an opportu. Nity of prostrating at Your Lotus Feet and obtaining Your Divine Darshan. Although we are parted by big stretches of land and water, Your Holiness is ever in my heart. I am determined more than ever to go out into the world in search of truth, which I shall ultimately find at Your Lotus Feet.

-Sri Dhasaratha, Durban, S.Africa.

During my stay in India I felt his good name pure and Sivananda is esteemed all over the world. I only want to assure the Swami that his students will always prove faith to him wherever his name is attached in publicity. He is an Apostle of truth and his is the Holy Mission on earth. Swami Sivananda is love and He is the living Truth. His whole life has been dedicated to dissemination of Truth.

Sri Swami Paramananda (Hertha), Berlin West, Germany.

The “Digest” comes out with Swamiji’s Message for Guru Purnima as the opening article in that issue. It has come out beautifully with a proper heading and note of introduction. I take this opportunity to offer my heart-felt thanks for the several books, the Holy Prasad and the Tulsi Mala. I have started Sadhana with this sacred Mala. Since reading your book: “Correspondence course in Yoga”, I am assiduously trying to purify my mind. As instructed by Thee in one of Thy letters, I am working without expecting reward and offering all my work as my Yajna to the Lord. Thanks to Thee, Gurudev, I am enjoying peace of mind. I shall keep Thee informed of my progress in the path which Thou hast shown me through your books and publications.

-Sri T.R.Vivekananda, Nugegoda, Ceylon.

With delight I am following your instructions. My mind is changing from depression to happiness. Trying my utmost to lead on the right track through your Grace. Thanks for your blessings and prayers. By your Grace I hope to achieve proper health and sound mind.

-Sri Lincoln D.Rajmoolie, Trinidad, B.W.I.

Gurudev, the dust of Thy Feet divine is in London now. I like to be able to continue my Sadhana in London to worship Thee and walk in Thy footsteps more than Maurtius. I have brought with me my Mala, Gita, Bible, Thy photo and thy books. I will

Consecrate a part of my house to be Thy shrine. Help to remain always a Brahmachari and later one day to your Sannyasi Disciple. Forget not, O Master I need your Grace. You have done wonderful things for me. The day before reading Marseill, O Lord, I prayed, Siva, grant me Thy Darshan. In my heart there was great yearning and faith. I slept in Thy arms. I had Satsang with an invisible and blissful VOICE. I heard something so beautiful and elevat. Ing. I can still remember some of the words of the VOICE: “The quiet soul likes peaceful surroundings. It finds its pleasure in the beauty of a clear sky. He (Sivananda) is Krishna.” I woke up. There was rain, darkness and thunder outside, but in my heart there was Sivananda, Light and Divinity.

-Sri Cyril D’Audine, London, England.

I am very anxious to get some of your teachings, whereby I may attain spiritual consciousness. I am ready for a spiritual Master, but I have not got any. If you can be the Captain, I have great hope that I shall reach the shore of success. With your grace I shall be able to get over all worldly ties and attain the

Truth. Accept me as your disciple.

-Sri Heeralall Sharma, Berbice, Br. Guiana.

Last month I had meditation and study in Winterthur, with Sri Hanna Herrmann (Swami Om karananda). Your book on Ten Upanishads is so very interesting. My Sadhana is regular. My thoughts are very often seeking the Divine Presence, and especially last night I was happy in my meditation, feeling that I had grasped a new truth. I will be able more and more to open myself for your spiritual help.

-Sri Ines Soring, Winterthuur, Switzerland.

After a long time of darkness in my soul, I had a real joy with your nice letter. It was difficult for me to believe that the Lord could bless me with such Divine Grace. I express you my gratitude for all and especially for your generous offer to help me in my spiritual path. I suffered deeply-I began to study your books: Science of Pranayam, Hatha Yoga -they helped me very much and therefore I began to know and love you. You are in my heart. I met you through books and please take my heart for ever. I will follow

your instructions. I am reading the Essence of Principal Upanishads, and it is the book that gave me a real divine help. When I study the book, it seems to me that I am out of this world, identifying myself with something that I can't explain. I wish to thank you again for all your great kindness towards me. Please receive the best of myself.

-Sri Olga de Monasterics, Gautemala City, S. America.

I have your photograph beside me always as a remembrance of your Healing and Inspiration. My health improves with each day. I read the Twelve Blessings daily and am gathering together people of spiritual inclination. I look forward to every day and every experience with a new inner growing and understanding.

Sri Elise E. Chalmers, Queensland, Australia.

May I first thank our Father in Heaven who showed me a way to correspond with you. I feel to join you in spirit to obtain from you some of your spiritual books to feed my soul. In other words I wish you to lead me to everlasting life in the name of our Lord.

-Sri K.N.Quartey, Accra, Ghana.

Earnestly and sincerely I wish to become your disciple and beg Your Holiness to accept me as one of the ever-growing family of your pupils and devotees. Mr.Zlabec gave me several books on your teachings such as the Mantra Shakti, The Right Path to Success in Life. I finished reading them with great enthusiasm and am greatly benefited. Master Eckehart says: "Don't desire anything". I followed him and took to breathing exercises. I long to have a spiritual preceptor, a living Guru and asked in my prayer for Grace, Truth and Light. I got an intuitive hint. I have a genuine desire to walk the Path to God sincerely. I know it requires tremendous courage to be united with Him. I am convinced that Your Holiness will accept my humble application for discipleship. Give me instructions to follow and exercises to practise. I am happy to know God is guiding my thoughts and has brought me to you.

Sri (Mrs.) B.Jermarova, Praha, Czechoslovia.

Thousands of Sashtanga Dandavat Pranams to Thy Lotus Feet. After a long period miracle has happened in my daily life and it has inspired me to write for Thy Holy guidance. Before three years, I had Your Holy Darshan. I prayed to learn Yoga, and you replied with smile and asked me to keep a pencil and a notebook ready. I experienced great joy and gained spiritual energy through Thy blessings. On August 21, 1961, I had a vision-Your Holy Darshan. You came to me, put your hands on my head and blessed me. Lastly while going off, you pointed out the Mala for more Japa. Gurudev, I have experienced tremendous pleasure which I am unable to express in words. Now in my spiritual path, I find progress more and more day by day.

VIDHYA

-Sri Bahadur Singh, Nairobi, E.Africa.

My gratitude for your kindness in sending books and periodicals. So often in thought one is in Rishikesh, one imagines what it must be like to be in the presence of the Holy Master; would that it were possible for me to accompany the Group of the Divine Life Society from Montreal on their trip to Rishikesh. Lord! May I yet have the grace of sitting at the feet of the Master? How thorny is the path, how steep and precipitous the ascent. There is at present, such a great dryness. To still the mind is so difficult, that one despairs; because without this stillness, I cannot hear the inner Voice or feel His Presence. I pray: "Lord,

lead me from darkness to light. Grant me freedom from lust, anger, egoism and greed. One has great need of your help, one prays for your Grace.

-Sri Eva Katzuman, Ottwa, Ontario, Canada.

I still look forward to my visit to your Ashram and meeting you. I am hopeful I can stay a while and learn something of your way of life. I feel I would love to serve Mother India and hence need some preparation. I enjoy reading your magazines. It is a joy to write to you, and wish you much health, long life and happiness. You are doing magnificent work.

-Sri Ina Selin, Hollywood, California, U.S.A.

My hearty thanks for your kind letter, containing blessings and good wishes. Your letter gave me strength and consolation. I try my best to work further in the sense of Akarta Bhav and Abhokta Bhav. Now I am preparing for the examination. Education should show me the way of right thingking and right living. I must take interest in my work; it is all for the divine purpose. Your letter always fills my heart with joy and gives me to face all the difficulties that may come. Whatever you do, is always good for me. Really your Kripa is boundless and infinite.

-Sri Sanat Hanover, Germany.

I thank you very much for your letter. I try to follow your instructions. I am not yet advanced in the meditation, but in my daily life Guru Mantra proves to be a great help. I remember God more, feel nearer Him and that makes me feel more peaceful. Give me your blessings to overcome Tamas and make my meditation progress.

-Sri Ngupadi, Surabaya, Indonesia.

Swamiji's very kind letter full of divine Grace to hand. This humble soul is indeed very fortunate to receive the blessings bestowed by His Holiness out of his immense Grace. I feel highly elated. There is a sense of confidence and hope. There is a feeling of added strength and keenness for Sadhana. A very heavy addict to coffee has been since given up. I take instead lime juice. I have taken up the vow of celibacy for life. I feel that Swamiji has passed some power to me. I am trying to cultivate love and patience with a view to get over anger. I wish to acknowledge receipt of Vibhuti Prasad, Japa Mala, Photo, Membership Card, Spiritual Diary Forms,etc. With Guruji's Grace I hope to succeed in fulfilling my resolves,

-Sri R.V.Kandaiah, Klang, Malaya,

Your letter was a real present to me. Your kind words went directly to my heart bringing peace and joy. I am sure that I will make a good progress in my practices because I know that you will kindly help and guide me. There is an inside feeling that makes me to realise That from now on I am really blessed.

-Sri Rua Sonza Lima,

25-Faft. FO2, Rio Esta Doda Guanabara, Brazil.

Beloved Master, Your letter is filled with love and wisdom. I do wish I could sit at your feet and humbly earn some of your great wisdom. I do try and live the life of a Yogin in this material world. I have given up all worldly possessions; the Lord has indeed been good to me. There are occasions when I feel a strong mental contact with you Swamiji, and have been much uplifted and strengthened. I send you all my love.

May the Lord spare you for many years in this life so that His children may come to you, and hear thy wisdom and receive love and strength. May all happiness be yours.

-Sri Evelyn Yeatman, Bulavayo, S. Rhodesia.

Best wishes to You for YOUR BIRTHDAY from the members of the Italian Section of the YogaVedanta Academy. You are the LIGHT that world wants, to save itself. You are the LIGHT we want. The books that YOU have been sending us are most interesting. The Magazine YOGA has just come out. On page 8 we have your Photo and an article:

"Lo Yoga per l'azione". I am preparing a lecture about YOUR HOLINESS for our October Service to be held at the Theosofic House in Corso Trieste in Rome. I am always deeply touched by YOUR very kind blessings.

-Sri Marcella Miconi, Accademia Italiana di Yoga-Vedanta, Rome, Italy.

SERVE LOVE MEDITATE REALIZE

THE DIVINE LIFE SOCIETY